चौखम्बा स्तोत्र ग्रन्थमाला
१५

सूर्यसहस्रनामस्तोत्रम्

(नामावली सहितम्)

चौखम्बा संस्कृत प्रतिष्ठान
३८, यू.ए., बंगलो रोड़, जवाहर नगर, दिल्ली

मूल्य १५.००

॥श्रीः॥

॥ सूर्यसहस्त्रनामस्तोत्रम् ॥

अष्टोत्तरनामावलिसंवलितम्

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू ए बंगलो रोड, जवाहरनगर

दिल्ली ११०००७

अन्य प्राप्तिस्थान
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपाल मन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१

चौखम्बा विद्याभवन
चौक (बनारस स्टेट बैंक भवन के पीछें)
पो० बा० नं० १०६९, वाराणसी २२१००१

॥ सूर्यसहस्रनामस्तोत्रम् ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

सङ्कल्प्य—

अस्यश्रीसूर्यसहस्रनामस्तोत्रमहामन्त्रस्य ।आदित्योपासकः श्रीसूर्यवर्चाऋषिः ।श्रीमदादित्यनारायणो देवता ब्रह्मवर्चस्विता मूलमिति बीजम् । सर्वपापविनाशक इतिशक्तिः । अग्निश्च जातवेदाश्चेति परमो मन्त्रः । हृद्रोगहारीति कीलकम् । निषङ्गी कवचीत्यस्त्रम् । भक्तरक्षणतत्पर इति कवचम् । श्रीमदादित्यप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

आदित्योऽदितिदेव इत्यंगुष्ठाभ्यां नमः मन्त्रो यन्त्रं तथा क्षेत्रमिति तर्जनीभ्यां स्वाहा । गायत्रीवल्लभः प्रांशुरिति मध्यमाभ्यां वौषट् ।छन्दोमयः शास्त्रमय इत्यनामिकाभ्यां हुम् । सुब्रह्मण्यश्च सूरीन्द्र इति कनिष्ठिकाभ्यां वषट् ।

सुरभूसुर दत्तार्घ्य शुद्धाम्बुग्रहणेरतइति करतलकरपृष्ठाभ्यां फट्। हृदयादिन्यासं च एवं कुर्यात् ॥

ध्येयस्सदासवितृमण्डलमध्यवर्तीति ध्यानम् —

आदित्यस्त्वाददिदेवोऽयं भास्करो भवनाशनः ।
विश्वमूर्तिर्विश्वनेता चिन्मूर्तिश्चिन्तितार्थदः ॥

इति त्रिवारं पठेत् :—

ततस्सहस्रनामपारायणं कृत्वा। उत्तरन्यासं कृत्वा । आदित्यायार्पयेत् ॥

मण्डलस्य च विस्तारं नमस्कारविधिं ततः ।
पूजाक्रमविशेषेण श्रुत्वा पुनरभाषत ॥

सूर्यवर्चा उवाच—

भगवन् सर्वतत्वज्ञ सर्वकर्मप्रवर्तक ।
नाम्नां सहस्रं दिव्यानां श्रोतुमिच्छाम्यहं रवेः ॥

बृहस्पतिरुवाच—

सूर्यवर्चः !शृणु परं सूर्यस्य च महात्मनः ।
उत्तमं नामसाहस्रं यत्तमस्ते निकृन्तति ॥
बृहस्पतिस्सभगवानित्युक्तसूर्यवर्चसम् ।
ध्यात्वा नारायणं देवं भानुमण्डलमध्यगम् ॥
ओमित्युच्चैरुपक्रम्य प्रोवाच भगवान् गुरुः ।
ओं आदित्यश्चादिदेवोऽयं भास्करो भवनाशनः ।

विश्वमूर्तिर्विश्वनेता चिन्मूर्तिश्चिन्तितार्थदः ॥ १

सद्योजातो वामदेवस्सर्वपापविनाशकः ।
वेद्यो वैद्यस्सदायोगी विश्वकर्मा विभावसुः ॥ २

विरिञ्चिर्विश्रुतात्मा च विश्वसर्गप्रवर्तकः ।
विद्यात्मा विषयज्ञश्च विश्वात्मा विश्वपापहा ॥ ३

विदुषामीश्वरो विद्वान्विश्वनेता विशेषवित् ।
वीरहा विषयश्शून्यो बालखिल्यादिवन्दितः ॥ ४

वामनो वरदः प्रांशुर्वासुदेवस्सनातनः ।
बालखिल्यपुरोगश्च वारिदो वसुमान्वसुः ॥ ५

वरेण्यो वसुदेवश्च वसुरेता वसुप्रदः ।
वायुर्वाचस्पतिर्विश्वं विष्णुर्विश्वामरेश्वरः ॥ ६

ओङ्कारश्च वषट्कारःसोमग्रहपुरोगमः ।
ग्रहनक्षत्रमाली च शिंशुमारशरीरवान् ॥ ७

शरण्यश्शङ्करश्शम्भुः कालात्मा कान्तिवर्धनः ।
कामदेवः कामहर्ता विराड्वीरासनस्थितः ॥ ८

विस्तारभूमा भूतेशो विश्वगुप्तनुरीश्वरः ।
मन्देहरिपुरिन्दुश्च बिन्दुस्सुन्दरविग्रहः ॥ ९

सामगानप्रियस्साधुस्सत्यसन्धस्सदाशिवः ।
समात्मासन्धिरव्यक्तं साम्बस्सारसवर्धनः ॥ १०

सूदस्सूक्ष्मस्सूक्ष्मकायस्सूक्ष्मदृक्सुदृगव्ययः ।
रथाङ्गहेतिरम्भोजवर्धनः सर्वसम्मतः ॥ ११
वज्रभृद्वत्सलो वाग्मी वागीशो वायुवाहनः ।
धर्मात्माऽधर्मशत्रुश्च कर्मसाक्षी परन्तपः ॥ १२
पञ्चाननः पञ्चमूर्त्तिः पञ्चाङ्गी पापभञ्जनः ।
पराशरः पुण्यमूर्तिः पुरुहूतानुजः परः ॥ १३
सनात्सर्वं सहस्सर्वस्सर्वगस्सर्वपोषकः ।
सप्ताश्वस्सप्तरज्जुश्च सप्तैधास्सप्तसारथिः ॥ १४
सप्तप्रियस्सप्तदोग्धा मुञ्जिकेशो मुरान्तकः ।

शुकश्शुद्धश्शुभाचारस्सर्वबीजमनायकः ॥ १५

कर्त्ता विकर्त्ता गहनो कारणं करणं महत् ।

अकुण्ठविक्रमश्शौरिर्वैकुण्ठो भगवान्भवः ॥ १६

भानुर्हंसस्सहस्त्रांशुस्तपनस्सविता पिता ।

जातुकर्णो जयी ज्यायान् मीनाङ्गी सिंहपालकः ॥ १७

एकोच्चस्सप्तनीचश्च षट्पतिर्मानवल्लभः ।

ऋतुस्सुदर्शनः कालः कुञ्जराननपूजितः ॥ १८

द्विजो द्विजश्शुचिर्धीरः श्रीमान् मूर्तित्रयात्मकः ।

शिवंकरः श्रीभूतेशस्सिन्धुरुच्चैश्श्रवा हरिः ॥ १९

पद्मप्रबोधकः पद्मी पद्मगर्भः प्रभाकरः ।

अह्नांप्रभुर्दिनमणिर्दैतेयकुलमृत्युकृत् ॥ २०
कला काष्ठा मुहूर्तात्मा दिनरात्रिशरीरवान् ।
पद्मापतिः परंधाम परमात्मा परायणम् ॥ २१
निदानं नित्यमद्वैतं केवलं मुक्तिकारणम् ।
सर्वभूतशरीरस्थं चैतन्यं ब्रह्मनिर्गुणम् ॥ २२
एको नैकः कृतिश्शान्तिर्मतिर्बुद्धिर्धृतिस्स्मृतिः ।
मन्त्रो यन्त्रं तथाक्षेत्रं क्षेत्रज्ञोऽक्षरसंज्ञिकः ॥ २३
इन्द्रियाणामधिष्ठाता तत्त्वं तत्पुरुषाग्रणीः ।
अमायी मायिनामग्र्यो लोकस्वामी स्वराड्गुरुः ॥ २४

प्राणदः प्रणवः प्राणो प्राप्तिसाधनमम्बरम् ।
जगन्मित्रं पवित्रं च देवानामपि दैवतम् ॥ २५

सिन्धुनिद्राब्धिरण्याङ्गो सैंहिकेयविशोधितः ।
विषुवच्छायनं कान्तिश्चन्द्रोत्पत्त्ययनं ग्रहः ॥ २६

दिगीशो देववृन्देशो नक्षत्रेशो धनेश्वरः ।
सूर्यवर्चास्सूरिराद्यस्सूर्यापतिरुमाधवः ॥ २७

विभाकरो द्वादशात्मा कपिलः कपिशिक्षकः ।
कपितातः कपिः पिङ्गः पंगुकालपिता हरः ॥ २८

विविक्तस्सागरस्सेतुस्ताम्रस्ताम्ररथो रथी ।
मेरुप्रभस्सुमेरुश्च बुधनुप्ररथो भवः ॥ २९

सहस्रप्रग्रहो धन्वी मेधावी श्रुतिसागरः ।
भिषक्पिता भिषक्सारो भैषजं भवरोगहृत् ॥ ३०
जन्मादिश्शास्त्रयोनिश्च विज्ञानं ज्ञानमेव च ।
ज्ञाता ज्ञेयं स्फुटस्फूर्तिरनीशो नाहविर्नृपः ॥ ३१
अविच्छिन्नान्वयश्शास्ता रामो राजीवलोचनः ।
गायत्रीवल्लभः प्रांशुर्गेयो गाता गुणार्णवः ॥ ३२
सत्यमेधास्समाम्नायस्सन्धाता कश्यपात्मजः ।
सर्वधर्ममयस्साक्षी चित्कूटनिलयोऽनलः ॥ ३३
चिरन्तनश्चिदात्मा च वैशाखशिखिवाहनः ।

अश्वत्थः कुशनाभश्च साम्राज्यं जगदीश्वरः ॥ ३४
दीप्तमूर्तिर्महामूर्तिस्सुतपाः ऋतुभुक्पशुः ।
यज्वा जाज्वल्यदेहश्च शत्रुमण्डलखण्डनः ॥ ३५
शरारुध्वंसकश्शास्ता शास्त्रयोनिर्निरञ्जनः ।
अनिन्द्यो निन्द्यविध्वंसी विश्वामित्रवरप्रदः ॥ ३६
विध्यर्थबोधको भानुर्विन्ध्यवीथी प्लवङ्गमः ।
तत्पदार्थोऽहंपदार्थस्तत्त्वमस्यर्थबोधकः ॥ ३७
त एते त्वमहं देवयक्षरक्षोभयङ्करः ।
मृत्युञ्जयः पाकभेदी सुषुम्नातालशोभितः ॥ ३८
सहस्राराम्बुजारूढो कर्णिकामध्यमण्डपः ।

गुहाशयश्शिवस्स्थाणुर्गोप्ता गणपतिर्गिरिः ॥ ३९
गोमूर्तिस्सर्वदेवात्मा सर्वसन्ध्याप्रवर्तकः ।
ज्योतिष्मानिन्द्रशर्मा च चिदानन्दो दिगम्बरः ॥ ४०
किरीटी कवची खड्गी शङ्खी शार्ङ्गी च पद्मकः ।
वेत्री शूली निषङ्गी च तापनस्तपतां वरः ॥ ४१
शङ्कश्शारुसर्वाङ्गस्सर्वबन्धविमोचकः ।
महात्मा चारुसर्वाङ्गस्सर्वभूषणभूषितः ॥ ४२
भक्तेप्सितार्थसन्धानकल्पवृक्षः ककुत्पतिः ।
बन्धूककुसुमप्रख्यस्सर्वशस्त्रभृतां वरः ॥ ४३

ब्रह्मण्यो ब्राह्मणो ब्राह्मी राजर्षिरमितप्रभः ।
सनातनवरस्सोमस्सर्वतत्त्वावलम्बनः ॥ ४४

महापातालसम्मान्यो मानिनामग्रणीर्महान् ।
सिद्धार्थकृत्सिद्धगुह्यः सिद्धानामुत्तमागतिः ॥ ४५

लोकनाथो विभानाथो माठरो मधुवल्लभः ।
तीक्ष्णांशुस्तीर्थगर्भश्च श्वेतलोहितवाहनः ॥ ४६

कर्म कर्मविदां नेता सदावरणमण्डलः ।
सहस्रगुरनन्तात्मा विशिष्टश्शिष्टपोषकः ॥ ४७

दिव्यमूर्तिर्दिवसिंहो दिविषत्प्रवरो दमः ।
विशालाक्षश्श्रीमूर्तिर्विश्वभर्ताविभावसुः ॥ ४८

मूर्धन्वदिष्टदायी च कृतिचिन्तानिवर्तकः ।
गन्धर्वगणगोप्ता च वस्वादिगणवन्दितः ॥ ४९

ग्रहपो ग्रहनेता च ग्रन्थिबन्धविभञ्जनः ।
ग्रसिष्णुर्ग्रहगोप्ता च ग्राही ग्राह्यशरीरभाः ॥ ५०

तपस्वी तापसश्शोच्यो तरणिर्द्युमणिर्मणिः ।
चिन्तामणिर्दिनमणिर्ज्योतिर्मणिरजेश्वरः ॥ ५१

छन्दोमयश्शास्त्रमयस्सर्वकान्तिखनिर्मनुः ।
अनूरुसारथिः पीलो पैप्पलो त्रिविलोचनः ॥ ५२

त्रिशिखी ब्राह्मणमयो ज्योतिस्सिद्धान्तबोधनः ।

त्रिनामा त्रिशरीरश्च त्रिकाण्डश्चण्डदीधितिः ॥ ५३
मुक्तिद्वारं मुनिवरो महोरस्को महामनाः ।
अन्नपात्रप्रदाता च विष्णुचिन्तापरः पुमान् ॥ ५४
आपदामपहर्त्ता च रोगकाण्डदवानलः ।
निवृत्तात्मा समावृत्तो चक्षुरिन्द्रियदेवता ॥ ५५
तपोमयस्तप्ततनुः पूषा पूषादिवन्दितः ।
सर्वजन्तुशरण्यश्च बह्वृचो बहुदायकः ॥ ५६
कृष्णात्मा कमनीयश्च सर्ववेदविभागकृत् ।
कर्णो विकर्णः कान्तश्च बहुभोजी बहुप्रियः ॥ ५७
दक्षिणो दक्षिणामूर्तिर्दयावान् दम्भवर्जितः ।

सद्भूतिः कोशगः कोशी सर्वसिद्धिपरायणः ॥ ५८
शिवदेहश्शिवात्मा च शिवदेहश्शिवप्रदः ।
वाराणसीवासपरो हंसतीर्थप्रवर्तकः ॥ ५९
सूर्यलिङ्गप्रतिष्ठाता सोमकान्तिर्विवर्धनः ।
सुग्रहस्सुखदस्सूक्ष्मस्खरस्स्वारित एवच ॥ ६०
संख्यावान्सर्वसंसारी सूरिः परपुरञ्जयः ।
कृतागमः कृतविधिः कृतशास्त्रः कृताह्निकः ॥ ६१
राजा राजद्वितीयश्च ग्रहराजः प्रमाणवित् ।
बाडबो बाडवामूलं हव्यं कव्यं पितृप्रियः ॥ ६२

समाधिवेत्ता सारार्थस्सारहक्श्शारदाप्रियः ।
रक्तपुष्पार्चनीयश्च रक्तगन्धाक्षतप्रियः ॥ ६३
परार्ध्यार्ध्यः पूर्णकान्तिः कृततत्त्वार्थनिर्णयः ।
निखिलप्राणनिलयो नित्यमेरुप्रदक्षिणः ॥ ६४
पूर्णः पूर्णयिता पूज्यः परमान्नकृतादरः ।
परहिंसादिरहितो गुरुमूर्तिर्गतिप्रदः ॥ ६५
गोपालो लोकपालश्च सर्वस्सर्वस्वमच्युतः ।
मरुदीशो मरुच्चक्षुर्मित्रो हृत्तापनाशकः ॥ ६६
हृद्रोगहारी कौमारी हरिमादिविनाशकः ।
उत्तरां दिवमारूढो हारिद्रः काकनायकः ॥ ६७

ह्रीं बीजमध्यनिलयो नवनाथविवर्धनः ।
योगिनीवन्द्यचरणो बलिग्रहणतत्परः ॥ ६८
नित्यकल्याणनिलयो कल्याणाचलसेवकः ।
कल्याणदानः कल्यात्माऽत्युग्रो रिपुभयङ्करः ॥ ६९
भूतिकृद्भूतिभृद्भूतिर्भूतभावनपूर्वजः ।
त्रियुगश्च त्रिपृष्ठश्च त्रिपान्मूर्तित्रयात्मकः ॥ ७०
सर्वविघ्नविनाशी च सर्वबन्धविमोचकः ।
त्रिशिरास्त्रिप्रलम्बश्च त्रिदंष्ट्रस्त्रिचतुर्गतिः ॥ ७१
कुजमित्रं पितृपतिः पितृकारक एव च ।

शुभाङ्गो लोकसारङ्गस्सारङ्गोऽरुणसारथिः ॥ ७२

पुण्यश्लोकः पुण्यदायी पुण्यकारी पुरातनः ।

विजयो विष्णुराजश्च विष्णुरातो भवादिहृत् ॥ ७३

वदान्यश्च विराड्रूपी विद्यानाथो विधिर्विधुः ।

प्रशस्तगुणसिन्धुश्च बन्धुर्वेदान्तवेदिनाम् ॥ ७४

तत्त्वार्थमाता ताम्राश्वस्तरुणस्तडिदुज्ज्वलः ।

तीर्णदुःखस्तीव्रवेगो चन्दनद्युतिरात्मवान् ॥ ७५

अर्कपर्णस्नानतोषी वीतिहोत्रादिदैवतः ।

एकाक्षश्चैकचक्रश्च स्वतेजोभास्स्वयंप्रभः ॥ ७६

परागतिः पिण्डजानामण्डजानां भयावहः ।

ह्रीं बीजमध्यनिलयो नवनाथविवर्धनः ।
योगिनीवन्द्यचरणो बलिग्रहणतत्परः ॥ ६८
नित्यकल्याणनिलयो कल्याणाचलसेवकः ।
कल्याणदानः कल्यात्माऽत्युग्रो रिपुभयङ्करः ॥ ६९
भूतिकृद्भूतिभृद्भूतिर्भूतभावनपूर्वजः ।
त्रियुगश्च त्रिपृष्ठश्च त्रिपान्मूर्तित्रयात्मकः ॥ ७०
सर्वविघ्नविनाशी च सर्वबन्धविमोचकः ।
त्रिशिरास्त्रिप्रलम्बश्च त्रिदंष्ट्रस्त्रिचतुर्गतिः ॥ ७१
कुजमित्रं पितृपतिः पितृकारक एव च ।

शुभाङ्गो लोकसारङ्गस्सारङ्गोऽरुणसारथिः ॥ ७२

पुण्यश्लोकः पुण्यदायी पुण्यकारी पुरातनः ।

विजयो विष्णुराजश्च विष्णुरातो भवादिहृत् ॥ ७३

वदान्यश्च विराड्रूपी विद्यानाथो विधिर्विधुः ।

प्रशस्तगुणसिन्धुश्च बन्धुर्वेदान्तवेदिनाम् ॥ ७४

तत्त्वार्थमाता ताम्राश्वस्तरुणस्तडिदुज्ज्वलः ।

तीर्णदुःखस्तीव्रवेगो चन्दनद्युतिरात्मवान् ॥ ७५

अर्कपर्णस्नानतोषी वीतिहोत्रादिदैवतः ।

एकाक्षश्चैकचक्रश्च स्वतेजोभास्स्वयंप्रभः ॥ ७६

परागतिः पिण्डजानामण्डजानां भयावहः ।

क्रुरव्रतः क्रूरकल्पो तामसः परवीरहा ॥ ७७
षट्पल्लवविधानज्ञष्षट्पल्लववरप्रदः ।
श्रुतिपादपसञ्चारी कोकिलः कमलाश्रयः ॥ ७८
कुष्ठव्याधिविनाशी च दुष्टपीडानिबर्हणः ।
धृतपद्मद्वयो योद्धा तेजोमण्डलमध्यगः ॥ ७९
सर्वाधिव्याधिशमनो सर्वतापालितापनः ।
सर्वसाक्षी सदुदयः स्वाष्टाक्षर्यधिदेवता ॥ ८०
स्फोटादिदोषहारी च गुल्मदुःखप्रभञ्जनः ।
योजनार्बुदसञ्चारी सालोक्यादिप्रदः पिता ॥ ८१

खेटः कृपीटदायी च नग्नो नलिनवल्लभः ।
कुन्तीप्रसन्नः कौबेरः श्रीवक्षाः श्रीनिकेतनः ॥ ८२
अरुणोऽरुणकेतुश्च युद्धप्रेतगतिप्रदः ।
संज्ञामनोनुकूलश्च महेन्द्रकृतपूजनः ॥ ८३
गरुडाग्रजसूतश्च सस्यालिसुहृदूर्मिकृत् ।
गोधूमधान्यनाथश्च वर्तुलाकारमण्डलः ॥ ८४
रुद्रप्रत्यधिदेवश्च हस्तनक्षत्रनायकः ।
गुञ्जापुञ्जप्रतीकाशः पवित्रीकृतवृत्रहा ॥ ८५
कालिंदीजनकश्चैव गोब्राह्मणहिते रतः ।
इन्द्रो वृद्धश्रवाः पूषा विश्ववेदाः प्रजापतिः ॥ ८६

अग्निर्वायुश्च सूर्यश्च वाय्वश्वो रश्मिपालकः ।
मरीच्यात्मा भुवनसूरद्रोही पुत्रदायकः ॥ ८७
महानाम्नीव्रतहितो महामानोपराक्षसः ।
आदित्योऽदितिदेवश्च दितिदेवो दिवस्पतिः ॥ ८८
व्योमसंदृग्विमानस्थो सुमृडीकस्सरोविभुः ।
स्मृतिप्रत्यक्षमैतिह्यमनुमानं विधायकः ॥ ८९
सतैस्सर्वैस्समाविष्टोऽणुर्महानधिवत्सरः ।
पटरो विक्लिधः पिंगः प्रदर्शी चोपदर्शकः ॥ ९०
नानामुखश्चैव शीर्षो ऋतुलक्षणलक्षितः ।

शुक्लात्मा दक्षिणः पक्षः कृष्णात्मा वामपक्षकः ॥ ९१

अहोद्यौर्विषुरूपी च विश्वावनविशेषवित् ।

अपशुश्चापशुघ्नश्च नपशुः पशुपालकः ॥ ९२

संवत्सरप्रियतमः प्रत्यक्षज्ञेयमण्डलः ।

षडुद्यमस्सप्तयात्रो विनादी चाभिधावकः ॥ ९३

षष्टिवल्गस्सार्ष्टिकश्च प्रैषकृत्प्रथमस्स्मृतः ।

अघोराक्षस्सदोनादी वाक्प्रयोजक एव च ॥ ९४

संवत्सरीणः कर्मफलपद्मापीत इवोज्ज्वलः ।

कनकोज्ज्वलवासाश्च अहताम्बर एव च ॥ ९५

कपर्दी विशिखश्चैव वातवान्मरुतां मुखम् ।

क्षपणो योत्स्यमानश्च हेमचक्षुरकोपनः ॥ ९६

अपध्वस्तश्च सन्नद्धस्सहृद्दग्जीवनप्रदः ।

न देवो न मनुष्यश्च नाग्निर्नेन्द्रो न मारुतः ॥ ९७

नोपमो रुद्रधन्वा च कर्मब्रह्मप्रपञ्चकः ।

ऋतुभिस्सन्नुतस्स्वामी सर्वकामधुगव्ययः ॥ ९८

आरोग्यस्थानभा भ्राजः पटरस्थानभा अपि ।

सप्तसूर्यार्पितश्चैव कश्यपो मेर्वमोचकः ॥ ९९

वात्स्यायनः पञ्चकर्णो सप्तहोता च ऋक्पतिः ।

तस्थिवाञ्जगदात्मा च वैशम्पायन एव च ॥ १००

अनम्भा अम्भसां मूलमग्निवायुपरायणम् ।
कश्यपस्यातिथिश्चैव सिद्धागमन एव च ॥ १०१

नम उक्तिप्रियः पुण्यो अजिराप्रभुरेव च ।
नर्यापाः पंक्तिराधश्च विसर्पी नीललोहितः ॥ १०२

नीलार्चिः पीतकार्चिश्च वायुरेकादशात्मकः ।
वासुकिर्वैद्युतश्चैव रजतः परुषादिकः ॥ १०३

नासत्यजनकश्चैव शाम्बश्चापपूरुषः ।
सुब्रह्मण्यश्च सूरीन्द्रो गौतमः कौशिकीपतिः ॥ १०४

अग्निश्च जातवेदश्च सहोजा अजिराप्रभुः ।
कः किं कं तत्सत्यमन्नममृतो जीव एव च ॥ १०५

व्ययजन्मानुजन्मोऽग्रस्सप्तसप्तकदृष्टिभाक् ।
भानुर्विधुश्च भौमश्च चन्द्रसूनुश्च गीष्पतिः ॥ १०६

उशना सूर्यसूनुश्च तमः केतुस्तथाद्रिभृत् ।
अर्धप्रहारो गुलिको यमकण्टक एव च ॥ १०७

कारको मारकश्चापि पोषकस्तोषकस्तथा ।
पश्चाल्लत्तः पुरोलत्तः पार्श्वलत्तस्तथैव च ॥ १०८

आकाशग्रहसंसेव्यो धूमकेतुविजृम्भणः ।
भूकम्पनादिहेतुश्च रक्तवृष्टिविधायकः ॥ १०९

गार्जन् पर्जन्यरूपी च दुर्जयो दुरतिक्रमः ।

निर्जराराध्यचरणो जरामरणवर्जितः ॥ १११०

वियद्गमनजंघालो वीतिहोत्रसमप्रभः ।

विरिञ्चिगर्भसम्भूतो विषव्यालविनाशकृत् ॥ १११

श्रीपुष्टिकीर्तिसन्दायी नमतां नमनप्रियः ।

वेदाध्ययनसम्पन्नो वेदान्तेषु च निष्ठितः ॥ ११२

शब्दशास्त्रप्रणेता च शब्दब्रह्ममयः परः ।

अर्थब्रह्ममयोऽर्थार्थी स्वार्थिनामर्थदायकः ॥ ११३

जपयज्ञस्तपोयज्ञो दानयज्ञस्तथैव च ।

स्वाध्याययज्ञो धर्मज्ञो नीतिज्ञो विज्ञ एव च ॥ ११४

गुहाशायी गुहाभेदी साक्षान्मन्मथमन्मथः ।

मञ्जुदेहो मञ्जुकान्तिर्महिमातिशयोज्ज्वलः ॥ ११५
मित्रविन्दावन्द्यपादो मुनिवृन्दावने हितः ।
ब्रह्मचारी सुमेधाश्च ऊर्ध्वरेतास्तपोमयः ॥ ११६
ऐंकारनिलयो वाग्मी वागर्थप्रद एव च ।
ह्रींकारनिलयो मायी इन्द्रजालादितत्त्ववित् ॥ ११७
श्रींकारनिलयश्श्रीमान् धनदो धनवर्धनः ।
श्रीचक्रराजनिलयः श्रीदेवीकर्णभूषणम् ॥ ११८
क्लींकारमध्यनिलयः कामराजवशंकरः ।
सौश्शक्तिसहितो ज्ञानदानदक्षः प्रकाशकः ॥ ११९

परमात्मान्तरात्मा च जीवात्मा च नियामकः ।
हृदयग्रन्थिभेत्ता च सर्वसंशयनाशनः ॥ १२०

ब्रह्मव्याख्याननिपुणो यज्ञदीक्षाधुरन्धरः ।
दौर्भाग्यतूलवातूलो जराध्वान्तनिवर्तकः ॥ १२१

द्वैतमोहविनाशी च भेदवादिविभेदनः ।
वीरभद्रमतध्वंसी वीराराध्यनिबर्हणः ॥ १२२

कापालिमतकोपी च मीमांसान्यायतत्परः ।
कार्तान्तिकवरस्सर्वकार्तान्तिकपरायणः ॥ १२३

जङ्गमाजङ्गमयो जानकीपूजितः पुरा ।

इक्ष्वाकुवंशनाथश्च इन्दिरास्थानसुन्दरः ॥ १२४

विद्याविनयविज्ञान त्रयीताण्डवमण्डपः ।
रामचन्द्रकुलाम्भोधिः कामिनीकामदायकः ॥ १२५
सङ्गीतशास्त्रनिपुणः स्वरविद्याप्रवतर्कः ।
राजग्रहोऽधिकारी च राजराजेश्वरीप्रियः ॥ १२६
राज्यं भोज्यं च साम्राज्यं वैराज्यं राज्यमेव च ।
गौः पञ्चगव्यं शुद्धात्मा चान्द्रायणफलप्रदः ॥ १२७
कृच्छ्रादिफलदायी च दारिद्र्यभयनाशनः ।
दुःखार्णवोत्तारकश्च दुरितव्रातखण्डनः ॥ १२८
ब्रह्महत्यादिविध्वंसी भ्रूणहत्यानिबर्हणः ।

गुरुद्रोहादिशमनो मातृगामिवधोद्यतः ॥ १२९

पञ्चास्त्रशस्त्रमेघालिझंझावातो झषादिकः ।
चित्रगुर्दानशौण्डश्च सिंहसंहननो युवा ॥ १३०

वैधव्यबाधाशमनो विधवानां गतिप्रदः ।
रजोदोषविनाशी च कृतपक्वान्नगर्हणः ॥ १३१

पट्टाभिषिक्तभक्तालिर्दुष्टमत्तेभकेसरी ।
अनर्गलगतिर्गूढो गोमतीतीरपुण्यकृत् ॥ १३२

जरायुदोषहारी च पूर्णायुर्योगकारकः ।
भक्ताब्जपूर्णचन्द्रश्च धर्ममार्गप्रवर्तकः ॥ १३३

सौवर्गसुखहेतुश्च निरयध्वंसदीक्षितः ।

भ्रमन्मण्डलसंस्थानो भ्रान्तिपित्तादिरोगहृत् ॥ १३४

मेहादिरोगशमनो पाण्डुक्षयविनाशनः ।
पापवेतालमन्त्रज्ञो पापकृज्जनदुर्लभः ॥ १३५

ज्वरादिदोषदूरश्च विज्वरीकृतभूसुरः ।
मोक्षनिश्रेणिकासाक्षी दाक्षायण्यादिसेवकः ॥ १३६

भावुको भद्रकरुणमश्विनीपुष्करोज्ज्वलः ।
प्रशस्तवान्निस्तुलन प्रबन्धशतकल्पनः ॥ १३७

भूनेता भूधरो भोगी भाग्यदायी भवप्रियः ।

कर्मन्दी वललः क्लीबः पशुपालोऽश्वपालकः ॥ १३८

शनिपीडाविनाशी च कृत्यादोषनिबर्हणः ।
आभिचारिकविध्वंसी गदावनदवानलः ॥ १३९

जपपूजार्चनरतो नारायणपदं परम् ।
पापपाषाणदलनटङ्कीकृतकरावलिः ॥ १४०

मोक्षलक्ष्मीकवाटश्च मातृकावर्णमण्डनः ।
अकारादिक्षकारान्तवर्णमालाविभूषणः ॥ १४१

अनुस्वारादिसंख्यात्मा स्वरो व्यञ्जन एव च ।
सर्वार्थदस्सर्वकर्मसर्वकार्यप्रकाशकः ॥ १४२

पञ्चविंशतितत्त्वस्थः पञ्चब्रह्मसमुद्भवः ।
पारमार्थिकसन्दायी परवादिगतिदायकः ॥ १४३

सफलीकृतपूजार्थो विफलीकृतदुष्कृतिः ।
श्रुतिस्मृतिसमाम्नातस्मार्तकर्मप्रकाशकः ॥ १४४

यज्ञोपवीतधारी च याज्ञवल्क्यादिवन्दितः ।
सुषुम्नायोगमध्यस्थो लम्बिकायोगसाधनः ॥ १४५

सालम्बनोद्दीपनादिक्रियाबीजं महामनुः ।
कल्पातिशायिसङ्कल्पो विकल्पविधिवर्जितः ॥ १४६

अनल्पमूर्तिरश्वात्मा स्वात्मानन्दविधायकः ।
आत्मानात्मविवेकज्ञो निरावरणबोधनः ॥ १४७

निदानभूतस्तत्त्वानां नित्यकल्याणसुन्दरः ।

शान्तरक्षणनिर्निद्रः श्रुतिस्मृतिशुभद्रुमः ॥ १४८
आलापीकृतवेदाङ्गो मालालंकृतकन्धरः ।
रुद्राक्षकङ्कणलसत्करो रुद्रजपप्रियः ॥ १४९
सदाशिवपरब्रह्मस्थानं श्रीशम्भुविग्रहः ।
मूलाधाराम्बुजारूढो दहराकाशमध्यगः ॥ १५०
सहस्राराम्बुजारूढो ज्ञानडोलाविलासवान् ।
वेलोल्लङ्घनसामर्थ्यो वेत्ता निर्वृतिदायकः ॥ १५१
सुरभूसुरदत्तार्घ्या शुद्धाम्बुग्रहणे रतः ।
ब्रह्मवर्चस्वितामूलं ब्रह्मश्रीसूर्यविग्रहः ॥ १५२
इति नामानि गौणानि भास्करस्य महात्मनः ।

कानिचिद्वर्णितान्यत्र देवस्यानन्तरूपिणः ॥ १५३

सूर्यवर्चः कृतार्थोऽसि त्वमद्य नहि संशयः ।
दिव्यानामपि यन्नाम्नां सहस्रमनुकीर्तितम् ॥ १५४

एतस्य श्रवणादेव कीर्तनाज्जीवकोटयः ।
तरन्ति दुस्तरं घोरं संसारं नात्र संशयः ॥ १५५

यश्शृणोति सदा नाम्नां सहस्रं भास्करस्य च ।
विद्याकामो लभेद्विद्यामर्थार्थी सार्थको भवेत् ॥ १५६

अनपत्यो लभेत्पुत्रमराजा राज्यमाप्नुयात् ।
ग्रहपीडा विनश्यन्ति नश्यन्ति ब्रह्मराक्षसाः ॥ १५७

आरोग्यमाप्नुयाद्रोगी कामी कामानवाप्नुयात् ।
किमत्र बहुनोक्तेन सर्वसिद्धिर्भविष्यति ॥ १५८

धर्मार्थकाममोक्षाणां साधनं सर्वसम्मतम् ।
श्रुतिस्मृतिपुराणादिसारार्थकृतनिर्णयम् ॥ १५९

नाम्नां सहस्त्रं यो भक्त्या पठेन्नियतमानसः ।
सिध्यन्ति सर्वधर्मार्थास्तस्य नैवात्र संशयः ॥ १६०

विश्वावसुरुवाच—

नारायण नमस्तेऽस्तु भानुमण्डलमध्यगः ।
कर्मणामपि धर्माणां साक्षीत्वं ब्रह्मनिर्मलम् ॥ १६१

अनन्तोऽनन्तनामा च श्रीमान् लोकत्रयेश्वरः ।

विभूतिः केन वा ज्ञेया ज्योतिषामयनस्य च ॥ १६२

गन्धर्वा ऊचुः—

सूर्यआत्मास्य जगतस्तस्थुषश्च त्वमेव हि ।
त्वामृते नहि पश्यामो जन्तूनां शरणं कलौ ॥ १६३

बालखिल्या ऊचुः—

यः कर्मसाक्षी विदुषां वरेण्यं भर्गश्च सूते सविता जगच्च ।
यो वृष्टिदायी तपनश्च पुष्टिदस्तमेव देवं गतिमाम्नाम ॥ १६४

वैखानसा ऊचुः —

कलाश्चेन्दोः कलास्सर्वाः कलाभिश्च प्रपञ्चिताः ।

तमेव कलयामोऽद्य चक्षुषो रतिदैवतम् ॥ १६५

वैष्णवा ऊचुः —

नारायणाश्रयो मर्त्यो नारायणपरायणः ।
सर्वत्र विजयी भूयात्स एव सविता स्वयम् ॥ १६६

रुद्रगणा ऊचुः —

अष्टमूर्तेरियं मूर्तिरेका दीप्तिमयी यतः ।
एनं भजाम लोकेशं भानुमण्डलमध्यगम् ॥ १६७

श्रीसूतः —

बृहस्पतिस्सुराचार्यः कृपया परया मुदा ।
सूर्यवर्चसमित्युक्त्वा विररामोमिति स्वयम् ॥ १६८

व्यासप्रसादाच्छ्रुतवानहमेतन्महर्षयः ! ।
भवन्तस्सर्वधर्मोर्थसिद्ध्यै नित्यं पठन्त्विदम् ॥ १६९

॥ इति श्रीस्कन्दपुराणे सूर्यसहस्रनामस्तोत्रं सम्पूर्णम् ॥

सूर्यसहस्रनामावलिः

ॐ आदित्याय नमः ।
ॐ आदिदेवाय नमः ।
ॐ भास्कराय नमः ।
ॐ भवनाशनाय नमः ।
ॐ विश्वमूर्तये नमः ।
ॐ विश्वनेत्रे नमः ।
ॐ चिन्मूर्तये नमः ।
ॐ चिंतितार्थदाय नमः ।
ॐ सद्योजाताय नमः ।
ॐ वामदेवाय नमः । १०
ॐ सर्वपापविनाशकाय नमः ।
ॐ वेद्याय नमः ।
ॐ वैद्याय नमः ।
ॐ सदायोगिने नमः ।
ॐ विश्वकर्मणे नमः ।
ॐ विभावसवे नमः ।
ॐ विरिंचये नमः ।
ॐ विश्रुतात्मने नमः ।

ॐ विश्वसर्गप्रवर्तकाय नमः ।

ॐ विद्यात्मने नमः । २०

ॐ विषयज्ञाय नमः ।

ॐ विश्वात्मनेनमः ।

ॐ विश्वपापघ्ने नमः ।

ॐ विदुषामीश्वराय नमः ।

ॐ विदुषे नमः ।

ॐ विश्वनेत्रे नमः ।

ॐ विशेषविदे नमः ।

ॐ वीरघ्ने नमः ।

ॐ विषमाय नमः ।

ॐ शून्यायनमः । ३०

ॐ बालखिल्यादिवंदिताय नमः ।

ॐ वामनाय नमः ।

ॐ वरदाय नमः ।

ॐ प्रांशवे नमः ।

ॐ वासुदेवाय नमः ।

ॐ सनातनाय नमः ।

ॐ बालखिल्यपुरोगाय नमः

ॐ वारिदाय नमः ।

ॐ वसुमते नमः ।

ॐ वसवे नमः । ४०

ॐ वरेण्याय नमः ।

ॐ वासुदेवाय नमः ।

ॐ वसुरेतसे नमः ।

ॐ वसुप्रदाय नमः ।

ॐ वायवे नमः ।

ॐ वाचस्पतये नमः ।

ॐ विश्वस्मै नमः

ॐ विष्णवे नमः ।

ॐ विश्वामरेश्वराय नमः ।

ॐ ओंकाराय नमः । ५०

ॐ वषट्काराय नमः ।

ॐ सोमग्रहपुरोगमाय नमः ।

ॐ ग्रहनक्षत्रमालिने नमः ।

ॐ शिंशुमारशरीरवते नमः ।

ॐ शरण्याय नमः ।

ॐ शङ्कराय नमः ।

ॐ शम्भवे नमः ।
ॐ कलात्मने नमः
ॐ कान्तिवर्धनाय नमः ।
ॐ कामदेवाय नमः । ६०
ॐ कामहर्त्रे नमः ।
ॐ विराजे नमः ।
ॐ वीरासनस्थिताय नमः ।
ॐ विस्तारभूम्ने नमः ।
ॐ भूतेशाय नमः ।

ॐ विश्वगुप्तऽनवे नमः
ॐ ईश्वराय नमः ।
ॐ मंदेहरिपवे नमः ।
ॐ इंदवे नमः ।
ॐ बिंदवे नमः । ७०
ॐ सुन्दरविग्रहाय नमः ।
ॐ सामगानप्रियाय नमः ।
ॐ साधवे नमः ।
ॐ सत्यसन्धाय नमः ।

ॐ सदाशिवाय नमः ।
ॐ समात्मने, संधये नमः ।
ॐ अव्यक्ताय नमः ।
ॐ साम्बाय नमः ।
ॐ सारसवर्धनाय नमः ।८०
ॐ सूदाय नमः ।
ॐ सूक्ष्माय नमः ।
ॐ सूक्ष्मकायाय नमः ।
ॐ सूक्ष्मदृशे नमः ।
ॐ सुदृशे नमः ।
ॐ अव्ययाय नमः ।
ॐ रथाङ्गहेतये नमः ।
ॐ अम्भोजवर्धनाय नमः ।
ॐ सर्वसम्मताय नमः ।
ॐ वज्रभृते नमः ।९०
ॐ वत्सलाय नमः ।
ॐ वाग्मिने नमः ।
ॐ वागीशाय नमः ।
ॐ वायुवाहनाय नमः ।
ॐ धर्मात्मने नमः ।

ॐ धर्मशत्रवे नमः ।
ॐ कर्मसाक्षिणे नमः ।
ॐ परंतपाय नमः ।
ॐ पञ्चाननाय नमः ।
ॐ पञ्चमूर्तये नमः । १००
ॐ पञ्चांगिने नमः ।
ॐ पापभञ्जनाय नमः ।
ॐ पराशराय नमः ।
ॐ पुण्यमूर्तये नमः ।

ॐ पुरुहूतानुजाय नमः ।
ॐ पराय नमः ।
ॐ सनाते नमः ।
ॐ सर्वसहाय नमः ।
ॐ सर्वस्मै नमः ।
ॐ सर्वगाय नमः । ११०
ॐ सर्वपोषकाय नमः ।
ॐ सप्ताश्वाय नमः ।
ॐ सप्तरज्जवे नमः ।

ॐ सप्तैधसे नमः ।
ॐ सप्तसारथये नमः ।
ॐ सप्तप्रियाय नमः ।
ॐ सप्तदोग्ध्रे नमः ।
ॐ मुञ्जिकेशाय नमः ।
ॐ मुरान्तकाय नमः ।
ॐ शुकाय नमः । १२०
ॐ शुद्धाय नमः ।
ॐ शुभाचाराय नमः ।
ॐ सर्वबीजाय नमः ।

ॐ अनामयकाय नमः ।
ॐ कर्त्रे नमः ।
ॐ विकर्त्रे नमः ।
ॐ गहनाय नमः ।
ॐ कारणाय नमः ।
ॐ करणाय नमः ।
ॐ महते नमः । १३०
ॐ अकुण्ठविक्रमाय नमः ।
ॐ शौरये नमः ।
ॐ वैकुण्ठाय नमः ।

ॐ भागवते नमः ।
ॐ भवाय नमः ।
ॐ भानवे नमः ।
ॐ हंसाय नमः ।
ॐ सहस्रांशवे नमः ।
ॐ तपनाय नमः ।
ॐ सवित्रे नमः । १४०
ॐ पित्रे नमः ।
ॐ जातकर्णाय नमः ।

ॐ जयिने नमः ।
ॐ ज्यायसे नमः ।
ॐ मीनांगिने नमः ।
ॐ सिंहपालकाय नमः ।
ॐ एकोच्चाय नमः ।
ॐ सप्तनीचाय नमः ।
ॐ षट्पतये नमः ।
ॐ मासवल्लभाय नमः । १५०
ॐ [illegible] नमः ।

ॐ सुदर्शनाय नमः ।
ॐ कालाय नमः ।
ॐ कुञ्जराननपूजिताय नमः ।
ॐ द्विजाय नमः ।
ॐ अद्विजाय नमः ।
ॐ शुचये नमः ।
ॐ धीराय नमः ।
ॐ श्रीमते नमः ।
ॐ मूर्तित्रयात्मकाय नमः ।१६०
ॐ शिवङ्कराय नमः ।

ॐ श्रीभूतेशाय नमः ।
ॐ सिन्धवे नमः ।
ॐ उच्चैश्श्रवसे नमः ।
ॐ हरये नमः ।
ॐ पद्मप्रबोधकाय नमः ।
ॐ पद्मिने नमः ।
ॐ पद्मगर्भाय नमः ।
ॐ प्रभाकराय नमः ।
ॐ अह्नप्रभवे नमः । १७०
ॐ [illegible] नमः ।

ॐ दैतेयकुलमृत्युकृते नमः ।
ॐ कलाकाष्ठामुहूर्तात्मने नमः ।
ॐ दिनरात्रिशरीरवते नमः ।
ॐ पद्मापतये नमः ।
ॐ परधाम्ने नमः ।
ॐ परमात्मने नमः ।
ॐ परायणाय नमः ।
ॐ निदानाय नमः ।
ॐ नित्याय नमः ।१८०

ॐ अद्वैताय नमः
ॐ केवलाय नमः ।
ॐ मुक्तिकारणाय नमः ।
ॐ सर्वभूतशरीरस्थाय नमः ।
ॐ चैतन्याय नमः ।
ॐ ब्रह्मणे नमः ।
ॐ निर्गुणाय नमः ।
ॐ एकाय नमः, एकस्मै नमः ।
ॐ नैकायनमः, नैकस्मै नमः ।

ॐ कृतये नमः ।१९०
ॐ शान्ताय नमः ।
ॐ मतये नमः ।
ॐ बुद्धये नमः ।
ॐ धृतये नमः ।
ॐ स्मृतये नमः ।
ॐ मन्त्राय नमः ।
ॐ यन्त्राय नमः ।
ॐ क्षेत्राय नमः ।
ॐ क्षेत्रज्ञाय नमः ।

ॐ अक्षरसंज्ञिकाय नमः ।२००
ॐ इन्द्रियाणामधिष्ठात्रे नमः ।
ॐ तत्त्वाय नमः ।
ॐ तत्पुरुषाग्रण्यै नमः ।
ॐ अमायिने नमः ।
ॐ मायिनामग्र्याय नमः ।
ॐ लोकस्वामिने नमः ।
ॐ स्वराजे नमः ।
ॐ गुरवे नमः ।
ॐ प्रमादाय नमः ।

ॐ प्रणवाय नमः ।२१०
ॐ प्राणाय नमः ।
ॐ प्राप्तिसाधनाय नमः ।
ॐ अम्बराय नमः ।
ॐ जगन्मित्राय नमः ।
ॐ पवित्राय नमः ।
ॐ देवानामपिदैवताय नमः ।
ॐ सिन्धुनिद्राते नमः ।
ॐ हिरण्याङ्गाय नमः ।
ॐ सैंहिकेयविशोधिताय नमः ।
ॐ विषुवते नमः । २२०
ॐ अयनाय नमः ।
ॐ कान्तये नमः ।
ॐ चन्द्रोत्पत्त्ययनाय नमः ।
ॐ ग्रहाय नमः ।
ॐ दिगीशाय नमः ।
ॐ देववृन्देशाय नमः ।
ॐ नक्षत्रेशाय नमः ।

ॐ धनेश्वराय नमः ।
ॐ सूर्यवर्चसे नमः ।
ॐ सूरये नमः । २३०
ॐ आद्याय नमः ।
ॐ सूर्यापतये नमः ।
ॐ उमाधवाय नमः ।
ॐ विभाकराय नमः ।
ॐ द्वादशात्मने नमः ।
ॐ कपिलाय नमः ।
ॐ कपिशिक्षकाय नमः ।

ॐ कपिताताय नमः ।
ॐ कपये नमः ।
ॐ पिङ्गाय नमः । २४०
ॐ पंगुकालपित्रे नमः ।
ॐ हराय नमः ।
ॐ विविक्ताय नमः ।
ॐ सागराय नमः ।
ॐ सेतवे नमः ।
ॐ ताम्राय नमः ।
ॐ ताम्ररथाय नमः ।

ॐ रथिने नमः ।
ॐ मेरुप्रभाय नमः ।
ॐ सुमेरवे नमः । २५०
ॐ बुधनुन्नरथाय नमः ।
ॐ भवाय नमः ।
ॐ सहस्रप्रग्रहाय नमः ।
ॐ धन्विने नमः ।
ॐ मेधाविने नमः ।
ॐ श्रुतिसागराय नमः ।
ॐ भिषक्पित्रे नमः ।
ॐ भिषक्साराय नमः ।
ॐ भैषजाय नमः ।
ॐ भवरोगहृते नमः । २६०
ॐ जन्मादये नमः ।
ॐ शास्त्रयोनये नमः ।
ॐ विज्ञानाय नमः ।
ॐ ज्ञानाय नमः ।
ॐ ज्ञात्रे नमः ।

ॐ ज्ञेयाय नमः ।

ॐ स्फुटाय नमः ।

ॐ स्फूर्तये नमः ।

ॐ अनीशाय नमः ।

ॐ त्रे नमः । २७०

ॐ हविषे नमः ।

ॐ नृपाय नमः ।

ॐ अविच्छिन्नान्वयाय नमः ।

ॐ शास्त्रे नमः ।

ॐ रामाय नमः ।

ॐ राजीवलोचनाय नमः ।

ॐ गायत्रीवल्लभाय नमः ।

ॐ प्रांशवे नमः ।

ॐ गेयाय नमः ।

ॐ गात्रे नमः । २८०

ॐ गुणार्णवाय नमः ।

ॐ सत्यमेधसे नमः ।

ॐ समाम्नायाय नमः ।

ॐ सन्धात्रे नमः ।

ॐ कश्यपात्मजाय नमः

ॐ सर्वधर्ममयाय नमः ।
ॐ साक्षिणे नमः ।
ॐ चित्कूटनिलयाय नमः ।
ॐ अनलाय नमः ।
ॐ चिरन्तनाय नमः । २९०
ॐ चिदात्मने नमः ।
ॐ वैशाखाय नमः ।
ॐ शिखिवाहनाय नमः ।
ॐ अश्वत्थाय नमः ।
ॐ कुशनाभाय नमः ।
ॐ साम्राज्याय नमः ।
ॐ जगदीश्वराय नमः ।
ॐ दीप्तमूर्तये नमः ।
ॐ महामूर्तये नमः ।
ॐ सुतपसे नमः ।
ॐ ऋतुभुजे नमः ।
ॐ पशवे नमः ।
ॐ यज्वने नमः ।

ॐ जाज्वल्यदेहाय नमः ।
ॐ शत्रुमण्डलखण्डनाय नमः ।
ॐ शरारुध्वंसकाय नमः ।
ॐ शास्त्रे नमः ।
ॐ शास्त्रयोनये नमः ।
ॐ निरञ्जनाय नमः ।
ॐ अनिन्द्याय नमः । ३१०
ॐ निन्द्यविध्वंसिने नमः ।
ॐ विश्वामित्रवरप्रदाय नमः ।
ॐ विश्वार्थबोधकाय नमः ।

ॐ भानवे नमः ।
ॐ विन्ध्यवीथीप्लवङ्गमाय नमः ।
ॐ तत्पदार्थाय नमः ।
ॐ अहंपदार्थाय नमः ।
ॐ तत्त्वमस्यर्थबोधकाय नमः ।
ॐ तेभ्यो नमः ।
ॐ एतेभ्यो नमः । ३२०
ॐ तुभ्यं नमः ।
ॐ मह्यं नमः ।
ॐ देवयक्षरक्षोभयङ्कराय नमः ।

ॐ मृत्युञ्जयाय नमः ।
ॐ पाकभेदिने नमः ।
ॐ सुषुम्नानालशोभिताय नमः ।
ॐ सहस्राराम्बुजारूढाय नमः ।
ॐ कर्णिकामध्यमण्डपाय नमः ।
ॐ गुहाशयाय नमः ।
ॐ शिवाय नमः । ३३०
ॐ स्थाणवे नमः ।
ॐ गोप्त्रे नमः ।

ॐ गुणपतये नमः ।
ॐ गिरये नमः ।
ॐ गोमूर्तये नमः ।
ॐ सर्वदेवात्मने नमः ।
ॐ सर्वसन्ध्याप्रवर्तकाय नमः ।
ॐ ज्योतिष्मते नमः ।
ॐ इन्द्रशर्मणे नमः ।
ॐ चिदानन्दाय नमः । ३४०
ॐ दिगम्बराय नमः ।

ॐ किरीटिने नमः ।
ॐ कवचिने नमः ।
ॐ खड्गिने नमः ।
ॐ शङ्खिने नमः ।
ॐ शार्ङ्गिणे नमः ।
ॐ पद्मकाय नमः ।
ॐ वेत्रिणे नमः ।
ॐ शूलिने नमः ।
ॐ निषङ्गिणे नमः ।३५०

ॐ तापनाय नमः ।

ॐ तपतांवराय नमः ।
ॐ शङ्कराय नमः ।
ॐ चारुसर्वाङ्गाय नमः ।
ॐ सर्वबन्धविमोचकाय नमः ।
ॐ महात्मने नमः ।
ॐ चारुसर्वाङ्गाय नमः ।
ॐ सर्वभूषणभूषिताय नमः ।
ॐ भक्तेप्सितार्थसन्धान-
ॐ कल्पवृक्षाय नमः ।
ॐ ककुत्पतये नमः । ३६०

ॐ बन्धूककुसुमप्रख्याय नमः ।
ॐ सर्वशास्त्रभृतांवराय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ ब्राह्मणे नमः ।
ॐ राजर्षये नमः ।
ॐ अमितप्रभाय नमः ।
ॐ सनातनवराय नमः ।
ॐ सोमाय नमः ।
ॐ सर्वतत्त्वावलम्बनाय नमः ।३७०

ॐ महापातालसम्मान्याय नमः ।
ॐ मानिनामग्रगण्याय नमः ।
ॐ महते नमः ।
ॐ सिद्धार्थकृते नमः ।
ॐ सिद्धगुह्याय नमः ।
ॐ सिद्धानामुत्तमागतये नमः ।
ॐ लोकनाथाय नमः ।
ॐ विभानाथाय नमः ।
ॐ माठराय नमः ।

ॐ मधुवल्लभाय नमः । ३८०
ॐ तीक्ष्णांशवे नमः ।
ॐ तीर्थगर्भाय नमः ।
ॐ श्वेतलोहितवाहनाय नमः ।
ॐ कर्मणे नमः ।
ॐ कर्मविदांनेत्रे नमः ।
ॐ सदावरणमण्डलाय नमः ।
ॐ सहस्रगवे नमः ।
ॐ अनन्तात्मने नमः ।
ॐ विशिष्टाय नमः ।

ॐ शिष्टपोषकाय नमः ।३९०
ॐ दिव्यमूर्तये नमः ।
ॐ देवसिंहाय नमः ।
ॐ दिविषत्प्रवराय नमः ।
ॐ दमाय नमः ।
ॐ विशालवक्षसे नमः ।
ॐ श्रीमूर्तये नमः ।
ॐ विश्वम्भरविभावसवे नमः ।
ॐ मर्धन्वते नमः ।
ॐ इष्टदायिने नमः ।

ॐ कृतिचिन्तानिवर्तकाय नमः ४००
ॐ गन्धर्वगणगोप्त्रे नमः ।
ॐ वस्वादिगणवन्दिताय नमः ।
ॐ ग्रहपाय नमः ।
ॐ ग्रहनेत्रे नमः ।
ॐ ग्रन्थिबन्धविभञ्जनाय नमः ।
ॐ ग्रसिष्णवे नमः ।
ॐ ग्रहगोप्त्रे नमः ।
ॐ ग्राहिणे नमः ।

ॐ ग्राह्यशरीरभासे नमः ।
ॐ तपस्विने नमः । ४१०
ॐ तापसाय नमः ।
ॐ शोच्याय नमः ।
ॐ तरणये नमः ।
ॐ द्युमणये नमः ।
ॐ मणये नमः ।
ॐ चिन्तामणये नमः ।
ॐ दिनमणये नमः ।

ॐ ज्योतिर्मणये नमः ।
ॐ अजेश्वराय नमः ।
ॐ छन्दोमयाय नमः । ४२०
ॐ शास्त्रमयाय नमः ।
ॐ सर्वकान्तिखनये नमः ।
ॐ मनवे नमः ।
ॐ अनूरुसारथये नमः ।
ॐ पीलाय नमः ।
ॐ पैप्पलाय नमः ।
ॐ त्रिविलोचनाय नमः ।

ॐ त्रिशिखिने नमः ।
ॐ ब्राह्मणमयाय नमः ।
ॐ ज्योतिस्सिद्धान्तबोधनय ४३०
ॐ त्रिनाम्ने नमः ।
ॐ त्रिशरीराय नमः ।
ॐ त्रिकाण्डाय नमः ।
ॐ चण्डदीधितये नमः ।
ॐ मुक्तिद्वाराय नमः ।
ॐ मुनिवराय नमः ।
ॐ महोरस्काय नमः ।

ॐ महामनसे नमः ।
ॐ अन्नपात्रप्रदात्रे नमः ।
ॐ विष्णुचिन्तापराय नमः । ४४०
ॐ पुंसे नमः ।
ॐ आपदामपहर्त्रे नमः ।
ॐ रोगकाण्डदवानलाय नमः ।
ॐ निवृत्तात्मने नमः ।
ॐ समावृत्ताय नमः ।
ॐ चक्षुरिन्द्रियदेवतायै नमः ।
ॐ तपोमयाय नमः ।
ॐ तप्ततनवे नमः ।
ॐ पूष्णे नमः ।
ॐ पूषादिवन्दिताये नम : । ४५०
ॐ सर्वजन्तुशरण्याय नमः ।
ॐ बह्वृचाय नमः ।
ॐ बहुदायकाय नमः ।
ॐ कृष्णात्मने नमः ।
ॐ कमनीयाय नमः ।

ॐ सर्ववेदविभागकृते नमः ।

ॐ कर्णाय नमः ।

ॐ विकर्णाय नमः ।

ॐ कान्ताय नमः ।

ॐ बहुभोजिने नमः । ४६०

ॐ बहुप्रियाय नमः ।

ॐ दक्षिणाय नमः ।

ॐ दक्षिणामूर्तये नमः ।

ॐ दयावते नमः ।

ॐ दम्भवर्जिताय नमः ।

ॐ सद्भूतये नमः ।

ॐ कोशगाय नमः ।

ॐ कोशिने नमः ।

ॐ सर्वसिद्धिपरायणाय नमः ।

ॐ शिवदेहाय नमः । ४७०

ॐ शिवात्मने नमः ।

ॐ शिवदेहाय नमः ।

ॐ शिवप्रदाय नमः ।

ॐ वाराणसीवासपराय नमः ।

ॐ हंसतीर्थप्रवर्तकाय नमः ।

ॐ सूर्यलिङ्गप्रतिष्ठात्रे नमः ।
ॐ सोमकान्तिविवर्धनाय नमः ।
ॐ सुग्रहाय नमः ।
ॐ सुखदाय नमः ।
ॐ सूक्ष्माय नमः । ४८०
ॐ स्वरस्वरिताय नमः ।
ॐ संख्यावते नमः ।
ॐ सर्वसंसारिणे नमः ।
ॐ सुरये नमः ।

ॐ परपुरञ्जयाय नमः ।
ॐ कृतागमाय नमः ।
ॐ कृतविधये नमः ।
ॐ कृतशास्त्राय नमः ।
ॐ कृताह्निकाय नमः ।
ॐ राज्ञे नमः । ४९०
ॐ राजद्वितीयाय नमः ।
ॐ ग्रहराजाय नमः ।
ॐ प्रमाणविदे नमः ।

ॐ बाडवाय नमः ।
ॐ बाडवामूलाय नमः ।
ॐ हव्याय नमः ।
ॐ कव्याय नमः ।
ॐ पितृप्रियाय नमः ।
ॐ समाधिवेत्रे नमः ।
ॐ सारार्थाय नमः । ५००
ॐ सारदृशे नमः ।
ॐ शारदाप्रियाय नमः ।
ॐ रक्तपुष्पार्चनीयाय नमः ।

ॐ रक्तगन्धाक्षतप्रियाय नमः ।
ॐ परार्घ्यार्घ्याय नमः ।
ॐ पूर्णकान्तये नमः ।
ॐ कृततत्त्वार्थनिर्णयाय नमः ।
ॐ निखिलप्राणनिलयाय नमः ।
ॐ नित्यमेरुप्रदक्षिणाय नमः ।
ॐ पूर्णाय नमः । ५१०
ॐ पूर्णयित्रे नमः ।
ॐ पूज्याय नमः ।
ॐ परमान्नकृतादराय नमः ।

ॐ परहिंसादिरहिताय नमः ।
ॐ गुरुमूर्तये नमः ।
ॐ गतिप्रदाय नमः ।
ॐ गोपालाय नमः ।
ॐ लोकपालाय नमः ।
ॐ सर्वस्मै नमः ।
ॐ सर्वस्वाय नमः । ५२०
ॐ अच्युताय नमः ।
ॐ मरुद्दीशाय नमः ।
ॐ मरुच्चक्षुषे नमः ।
ॐ मित्राय नमः ।
ॐ हृत्तापनाशकाय नमः ।
ॐ हृद्रोगहारिणे नमः ।
ॐ कौमारिणे नमः ।
ॐ हरिमादिविनाशकाय नमः ।
ॐ उत्तरांदिवमारूढाय नमः ।
ॐ हारिद्राय नमः । ५३०
ॐ कोकनायकाय नमः ।

ॐ ह्रींबीजमध्यनिलयाय नमः ।

ॐ नवनाथविवर्धनाय नमः ।

ॐ योगिनीवन्द्यचरणाय नमः ।

ॐ बलिग्रहणतत्पराय नमः ।

ॐ नित्यकल्याणनिलयाय नमः ।

ॐ कल्याणाचलसेवकाय नमः ।

ॐ कल्याणदानकल्पात्मने नमः ।

ॐ अत्युग्राय नमः ।

ॐ रिपुभयङ्कराय नमः ।५४०

ॐ भूतिकृते नमः ।

ॐ भूतिभृते नमः ।

ॐ भूतये नमः ।

ॐ भूतभावनपूर्वजाय नमः ।

ॐ त्रियुगाय नमः ।

ॐ त्रिपृष्ठाय नमः ।

ॐ त्रिपादे नमः ।

ॐ मूर्तित्रयात्मकाय नमः ।

ॐ सर्वविघ्नविनाशिने नमः ।

ॐ सर्वबन्धविमोचकायनमः ।

ॐ त्रिशिरसे नमः ।

ॐ त्रिप्रलम्बाय नमः ।
ॐ त्रिदंष्ट्राय नमः ।
ॐ त्रिचतुर्गतये नमः ।
ॐ कुजमित्राय नमः ।
ॐ पितृपतये नमः ।
ॐ पितृकारकाय नमः ।
ॐ शुभाङ्गाय नमः ।
ॐ लोकसारङ्गाय नमः ।
ॐ सारङ्गाय नमः ।५६०

ॐ अरुणसारथये नमः ।
ॐ पुण्यश्लोकाय नमः ।
ॐ पुण्यदायिने नमः ।
ॐ पुण्यकारिणे नमः ।
ॐ पुरातनाय नमः ।
ॐ विजयाय नमः ।
ॐ विष्णुराजाय नमः ।
ॐ विष्णुरताय नमः ।
ॐ भवादिहते नमः ।

ॐ वदान्याय नमः । ५७०
ॐ विराड्रूपिणे नमः ।
ॐ विद्यानाथाय नमः ।
ॐ विधये नमः ।
ॐ विधवे नमः ।
ॐ प्रशस्तगुणसिन्धवे नमः ।
ॐ वेदान्तवेदिबन्धवे नमः ।
ॐ तत्त्वार्थमात्रे नमः ।
ॐ ताम्राश्वाय नमः ।
ॐ तरुणाय नमः ।

ॐ तडिदुज्ज्वलाय नमः ।५८०
ॐ तीर्णदुःखाय नमः ।
ॐ तीव्रवेगाय नमः ।
ॐ चन्दनद्युतये नमः ।
ॐ आत्मवते नमः ।
ॐ अर्कपर्णस्नानतोषिणे नमः ।
ॐ वीतिहोत्रादिदैवताय नमः ।
ॐ एकाक्षाय नमः ।
ॐ एकचक्राय नमः ।
ॐ स्वतेजोभासे नमः ।

ॐ स्वयंप्रभाय नमः । ५९०
ॐ पिण्डजपरागतये नमः ।
ॐ अण्डजभयापहाय नमः ।
ॐ क्रूरव्रताय नमः ।
ॐ क्रूरकल्पाय नमः ।
ॐ तामसाय नमः ।
ॐ परवीरघ्ने नमः ।
ॐ षट्पल्लवविधानज्ञाय नमः ।
ॐ षट्पल्लववरप्रदाय नमः ।

ॐ श्रुतिपादपसञ्चारिणे नमः ।
ॐ कोकिलाय नमः । ६००
ॐ कमलाश्रयाय नमः ।
ॐ कुष्ठव्याधिविनाशिने नमः ।
ॐ दुष्टपीडानिवर्हणाय नमः ।
ॐ धृतपद्मद्वयाय नमः ।
ॐ योद्धे नमः ।
ॐ तेजोमंण्डलमध्यगाय नमः ।
ॐ सर्वाधिव्याधिशमनाय नमः ।

ॐ सर्वतापालितापनाय नमः ।
ॐ सर्वसाक्षिणे नमः ।
ॐ सदुदयाय नमः । ६१०
ॐ स्वाष्टाक्षर्यधिदेवतायै नमः ।
ॐ स्फोटादिदोषहारिणे नमः ।
ॐ गुल्मदुःखप्रभञ्जनाय नमः ।
ॐ योजनार्बुदसञ्चारिणे नमः ।
ॐ सालोक्यादिप्रदाय नमः ।
ॐ पित्रे नमः ।
ॐ त्रेयाय नमः ।

ॐ कृपीटदायिने नमः ।
ॐ नग्नाय नमः ।
ॐ नलिनवल्लभाय नमः । ६२०
ॐ कुन्तीप्रसन्नाय नमः ।
ॐ कौबेराय नमः ।
ॐ श्रीवक्षसे नमः ।
ॐ श्रीनिकेतनाय नमः ।
ॐ अरुणाय नमः ।
ॐ अरुणकेतवे नमः ।
ॐ [illegible]गतिप्रदाय नमः ।

ॐ संज्ञामनोनुकूलाय नमः ।
ॐ महेन्द्रकृतपूजनाय नमः ।
ॐ गरुडाग्रजसूताय नमः । ६३०
ॐ सस्यालिसुहृदे नमः ।
ॐ ऊर्मिकृते नमः ।
ॐ गोधूमधान्यनाथाय नमः ।
ॐ वर्तुलाकारमण्डलाय नमः ।
ॐ रुद्रप्रत्यधिदेवाय नमः ।
ॐ हस्तनक्षत्रनायकाय नमः ।
ॐ गुञ्जापुञ्जप्रतीकाशाय नमः ।
ॐ पवित्रीकृतवृत्रहणे नमः ।
ॐ कालिन्दीजनकाय नमः ।
ॐ गोब्राह्मणहितेरताय नमः ६४०
ॐ इन्द्राय नमः ।
ॐ वृद्धश्रवसे नमः ।
ॐ पूष्णे नमः ।
ॐ विश्ववेदसे नमः ।
ॐ प्रजापतये नमः ।

ॐ अग्नये नमः ।
ॐ वायवे नमः ।
ॐ सूर्याय नमः ।
ॐ वाय्वश्वाय नमः ।
ॐ रश्मिपालकाय नमः । ६५०
ॐ मरीच्यात्मने नमः ।
ॐ भुवनसुवे नमः ।
ॐ अद्रोहणे नमः ।
ॐ पुत्रदायकाय नमः ।
ॐ महानाम्नीव्रतहिताय नमः ।

ॐ महामानाय नमः ।
ॐ अपराक्षसाय नमः ।
ॐ आदित्याय नमः ।
ॐ दितिदेवाय नमः ।
ॐ दिवस्पतये नमः । ६६०
ॐ व्योमसंदृग्विमानस्थाय नमः ।
ॐ सुमृडीकाय नमः ।
ॐ सरोविभवे नमः ।
ॐ स्मृतये नमः ।
ॐ प्रत्यक्षाय नमः ।

ॐ ऐतिह्याय नमः ।

ॐ अनुमानाय नमः ।

ॐ विधायकाय नमः ।

ॐ तत्सर्वसमाविष्टाय नमः ।

ॐ अणवे नमः । ६७०

ॐ महते नमः ।

ॐ अधिवत्सराय नमः ।

ॐ पटराय नमः ।

ॐ विक्लिधाय नमः ।

ॐ पिङ्गाय नमः ।

ॐ प्रदर्शिने नमः ।

ॐ उपदर्शकाय नमः ।

ॐ नानामुखाय नमः ।

ॐ एकशीर्षाय नमः ।

ॐ ऋतुलक्षणलक्षिताय नमः ।

ॐ शुक्लात्मने नमः ।

ॐ दक्षिणपक्षाय नमः ।

ॐ कृष्णात्मने नमः ।

ॐ वामपक्षकाय नमः ।
ॐ अह्ने नमः ।
ॐ दिवे नमः ।
ॐ विषुरूपिणे नमः ।
ॐ विश्वावनविशेषविदे नमः ।
ॐ अपशवे नमः ।
ॐ अपशुघ्नाय नमः । ६९०
ॐ नपशवे नमः ।
ॐ पशुपालकाय नमः ।
ॐ संवत्सरप्रियतमाय नमः ।

ॐ प्रत्यक्षज्ञेयमण्डलायनमः ।
ॐ षड्डुद्यमाय नमः ।
ॐ सप्तयात्राय नमः ।
ॐ विनादिने नमः ।
ॐ अभिधावकाय नमः ।
ॐ षष्टिवल्गाय नमः ।
ॐ साष्ट्रिकाय नमः । ७००
ॐ प्रैषकृते नमः ।
ॐ प्रथमस्मृताय नमः ।
ॐ अधोरक्षाय नमः ।

ॐ सदोनादिने नमः ।
ॐ वाक्प्रयोजकाय नमः ।
ॐ संवत्सरीणाय नमः ।
ॐ कर्मफलाय नमः ।
ॐ पद्मापीतइवोज्ज्वलाय नमः ।
ॐ कनकोज्ज्वलवाससे नमः ।
ॐ अहताम्बराय नमः ।७१०
ॐ कपर्दिने नमः ।
ॐ विशिखाय नमः ।
ॐ वातवते नमः ।
ॐ मरुतांमुखाय नमः ।
ॐ क्षपणाय नमः ।
ॐ योत्स्यमानाय नमः ।
ॐ हेमचक्षुषे नमः ।
ॐ अकोपनाय नमः ।
ॐ अपध्वस्ताय नमः ।
ॐ सन्नद्धाय नमः ।७२०
ॐ सहदृशे नमः ।

ॐ जीवनप्रदाय नमः ।

ॐ नदेवाय नमः ।

ॐ नमनुष्याय नमः ।

ॐ नाग्नये नमः ।

ॐ नेन्द्राय नमः ।

ॐ नमारुताय नमः ।

ॐ नोपमाय नमः ।

ॐ रुद्रधन्वने नमः ।

ॐ कर्मब्रह्मप्रपञ्चकाय ७३०

ॐ ऋतुभिस्सन्नताय नमः ।

ॐ स्वामिने नमः ।

ॐ सर्वकामदुहे नमः ।

ॐ अव्ययाय नमः ।

ॐ आरोग्यस्थानाभाभ्राजाय नमः ।

ॐ पटरस्थानभासे नमः ।

ॐ सप्तसूर्यार्पिताय नमः ।

ॐ कश्यपाय नमः ।

ॐ मेर्वमोचकाय नमः ।

ॐ वात्स्यायनाय नमः । ७४०

ॐ पञ्चकर्णाय नमः ।

ॐ सप्तहोत्रे नमः ।
ॐ ऋक्पतये नमः ।
ॐ तस्थिवते नमः ।
ॐ जगदात्मने नमः ।
ॐ वैशम्पायनाय नमः ।
ॐ अनम्भसे नमः ।
ॐ अम्भसाम्मूलाय नमः ।
ॐ अग्निवायुपरायणाय नमः ।
ॐ कश्यपातिथये नमः । ७५०

ॐ सिद्धागमनाय नमः ।
ॐ नम उक्तिप्रियाय नमः ।
ॐ पुण्याय नमः ।
ॐ अजिराप्रभवे नमः ।
ॐ नर्यापसे नमः ।
ॐ पंक्तिराधसे नमः ।
ॐ विसर्पिणे नमः ।
ॐ नीललोहिताय नमः ।
ॐ नीलार्चिषे नमः ।

ॐ पीतकार्चिषे नमः ।७६०
ॐ वायवे नमः ।
ॐ एकादशात्मकाय नमः ।
ॐ वासुकये नमः ।
ॐ वैद्युताय नमः ।
ॐ रजताय नमः ।
ॐ परुषादिकाय नमः ।
ॐ नासत्यजनकाय नमः ।
ॐ ओं शाम्बराय नमः ।
ॐ अपपूरुषाय नमः ।

ॐ सुब्रह्मण्याय नमः ।७७०
ॐ सूरीन्द्राय नमः ।
ॐ गौतमाय नमः ।
ॐ कौशिकीपतये नमः ।
ॐ अग्नये नमः ।
ॐ जातवेदसे नमः ।
ॐ सहोजसे नमः ।
ॐ अजिराप्रभवे नमः ।
ॐ कस्मै नमः ।
ॐ किमात्मने नमः ।

ॐ काय नमः ।७८०
ॐ तस्मै नमः ।
ॐ सत्याय नमः ।
ॐ अन्नाय नमः ।
ॐ अमृताय नमः ।
ॐ जीवाय नमः ।
ॐ द्वयजन्मने नमः ।
ॐ अनुजन्मने नमः ।
ॐ उग्राय नमः ।
ॐ सदृसप्तकमष्टिभाजे नमः ।
ॐ भानवे नमः ।७९०
ॐ विधवे नमः ।
ॐ भौमाय नमः ।
ॐ चन्द्रसूनवे नमः ।
ॐ गीष्पतये नमः ।
ॐ उशनसे नमः ।
ॐ सूर्यसूनवे नमः ।
ॐ तमसे नमः ।

ॐ केतवे नमः ।
ॐ अद्रिभृते नमः ।
ॐ अर्धप्रहाराय नमः । ८००
ॐ गुलिकाय नमः ।
ॐ यमकण्टकाय नमः ।
ॐ कारकाय नमः ।
ॐ मारकाय नमः ।
ॐ पोषकाय नमः ।
ॐ तोषकाय नमः ।
ॐ पश्चाल्लताय नमः ।

ॐ पुरोल्लताय नमः ।
ॐ पार्श्वलत्ताय नमः ।
ॐ आकाशग्रहसंसेव्यायनमः । ८१०
ॐ धूमकेतुविजृम्भणाय नमः ।
ॐ भूकम्पनादिहेतवे नमः ।
ॐ रक्तवृष्टिविधायकाय नमः ।
ॐ गर्जत्पर्जन्यरूपिणे नमः ।
ॐ दुर्जयाय नमः ।
ॐ दुरतिक्रमाय नमः ।
ॐ निर्जराराध्यचरणाय नमः ।

ॐ जरामरणवर्जिताय नमः ।
ॐ वियद्गमनजङ्घालाय नमः ।
ॐ वीतिहोत्रसमप्रभाय नमः ।८२०
ॐ विरिञ्चिगर्भसम्भूताय नमः ।
ॐ विषव्यालविनाशकृते नमः ।
ॐ श्रीपुष्टिकीर्तिसन्दायिने नमः ।
ॐ नमतां नमनप्रियाय नमः ।
ॐ वेदाध्ययनसम्पन्नाय नमः ।
ॐ वेदान्तनिष्ठिताय नमः ।
ॐ शब्दशास्त्रप्रणेत्रे नमः ।
ॐ शब्दब्रह्ममयाय नमः ।
ॐ पराय नमः ।
ॐ अर्थब्रह्ममयाय नमः ।८३०
ॐ अर्थार्थिने नमः ।
ॐ स्वार्थिनामर्थदायकाय नमः ।
ॐ जपयज्ञाय नमः ।
ॐ तपोयज्ञाय नमः ।
ॐ दानयज्ञाय नमः ।

ॐ स्वाध्याययज्ञाय नमः ।
ॐ धर्मज्ञाय नमः ।
ॐ नीतिज्ञाय नमः ।
ॐ विज्ञाय नमः ।
ॐ गुहाशायिने नमः ।८४०
ॐ गुहभेदिने नमः ।
ॐ साक्षान्मन्मथमन्मथाय नमः ।
ॐ मञ्जुदेहाय नमः ।
ॐ मञ्जुकान्तये नमः ।
ॐ महिमातिशयोज्ज्वलाय नमः ।

ॐ मित्रविन्दावन्द्यपादाय नमः ।
ॐ मुनिवृन्दावनहिताय नमः ।
ॐ ब्रह्मचारिणे नमः ।
ॐ सुमेधसे नमः ।
ॐ ऊर्ध्वरेतसे नमः ।८५०
ॐ तपोमयाय नमः ।
ॐ ऐङ्कारनिलयाय नमः ।
ॐ वाग्मिने नमः ।
ॐ वागर्थप्रदाय नमः ।
ॐ ह्रींकारनिलयाय नमः ।

ॐ मायिने नमः ।
ॐ इन्द्रजालादितत्त्वविदे नमः ।
ॐ श्रीङ्कारनिलयाय नमः ।
ॐ श्रीमते नमः ।
ॐ धनदाय नमः । ८६०
ॐ धनवर्धनाय नमः ।
ॐ श्रीचक्रराजनिलयाय नमः ।
ॐ श्रीदेवीकर्णभूषणाय नमः ।
ॐ क्लींकारमध्यनिलयाय नमः
ॐ कामराजवशंकराय नमः ।
ॐ सौश्शक्तिसहिताय नमः ।
ॐ ज्ञानदानदक्षाय नमः ।
ॐ प्रकाशकाय नमः ।
ॐ परमात्मने नमः ।
ॐ अन्तरात्मने नमः । ८७०
ॐ जीवात्मने नमः ।
ॐ नियामकाय नमः ।
ॐ हृदयग्रन्थिभेत्त्रे नमः ।

ॐ सर्वसंशयनाशनाय नमः ।
ॐ ब्रह्मव्याख्याननिपुणाय नमः ।
ॐ यज्ञदीक्षाधुरन्धराय नमः ।
ॐ दौर्भाग्यतूलवातूलाय नमः ।
ॐ जराध्वान्तनिवर्तकाय नमः ।
ॐ द्वैतमोहविनाशिने नमः ।
ॐ भेदवादिविभेदनायनमः ।८८०
ॐ वीरभद्रमतध्वंसिने नमः ।
ॐ वीराराध्यनिबर्हणाय नमः ।
ॐ कापालिमतकोपिने नमः ।

ॐ मीमांसान्यायतत्पराय नमः ।
ॐ कार्तान्तिकवराय नमः ।
ॐ सर्वकार्तान्तिकपरायणाय नमः ।
ॐ जङ्गमाजङ्गममयाय नमः ।
ॐ जानकीपूजिताय नमः ।
ॐ इक्ष्वाकुवंशनाथाय नमः ।
ॐ इन्दिरास्थानसुन्दराय नमः ८९०
ॐ विद्याविनयविज्ञानाय नमः ।
ॐ त्रयीताण्डवमण्डपाय नमः ।
ॐ रामचन्द्रकुलाम्भोधये नमः ।

ॐ क ामिनीकामदायकाय नमः ।
ॐ सङ्गीतशास्त्रनिपुणाय नमः ।
ॐ सर्वविद्याप्रवर्तकाय नमः ।
ॐ राजग्रहाय नमः ।
ॐ अधिकारिणे नमः ।
ॐ राजराजेश्वरीप्रियाय नमः ।
ॐ राज्याय नमः । ९००
ॐ भोज्याय नमः ।
ॐ साम्राज्याय नमः ।
ॐ वैराज्याय नमः ।
ॐ राज्याय नमः ।
ॐ गवे नमः ।
ॐ पञ्चगव्याय नमः ।
ॐ शुद्धात्मने नमः ।
ॐ चान्द्रायणफलप्रदाय नमः ।
ॐ कृच्छ्रादिफलदायिने नमः ।
ॐ दारिद्र्यभयनाशनाय नमः ९१०
ॐ दुःखार्णवोत्तारकाय नमः ।

ॐ दुरितव्रातखण्डनाय नमः ।
ॐ ब्रह्महत्यादिविध्वंसिने नमः ।
ॐ भ्रूणहत्यानिबर्हणाय नमः ।
ॐ गुरुद्रोहादिशमनाय नमः ।
ॐ मातृगामिवधोद्यताय नमः ।
ॐ पञ्चास्त्रशस्त्रमेघालि –
ॐ जंझावाताय नमः ।
ॐ झषादिकाय नमः ।
ॐ चित्रगवे नमः ।
ॐ दानशौण्डाय नमः ।१२०

ॐ सिंहसंहननाय नमः ।
ॐ यूने नमः ।
ॐ वैधव्यबाधाशमनाय नमः ।
ॐ विधवानाङ्गतिप्रदाय नमः ।
ॐ रजोदोषविनाशिने नमः ।
ॐ कृतपक्वान्नगर्हणाय नमः ।
ॐपट्टाभिषिक्तभक्तालये नमः ।
ॐ दुष्टमत्तेभकेसरिणे नमः ।
ॐ अनगर्लगतये नमः ।
ॐ गूढाय नमः ।१३०

ॐ गोमतीतीरपुण्यकृते नमः ।
ॐ जरायुदोषहारिणे नमः ।
ॐ पूर्णायुर्योगकारकाय नमः ।
ॐ भक्ताब्धिपूर्णचन्द्राय नमः ।
ॐ धर्ममार्गप्रवर्तकाय नमः ।
ॐ सौवर्गसुखहेतवे नमः ।
ॐ निरयध्वंसदीक्षिताय नमः ।
ॐ भ्रमन्मण्डलसंस्थानाय नमः ।
ॐ भ्रान्तिपित्तादिरोगहृते नमः ।
ॐ मेहादिरोगशमनाय नमः १४०
ॐ पाप्दुक्षयविनाशनाय नमः ।
ॐ पापवेतालमन्त्रज्ञाय नमः ।
ॐ पापकृज्जनदुर्लभाय नमः ।
ॐ ज्वरादिदोषदूराय नमः ।
ॐ विज्वरीकृतभूसुराय नमः ।
ॐ मोक्षनिश्रेणिकासाक्षिणे नमः ।
ॐ दाक्षायण्यादिसेवकाय नमः ।
ॐ भावुकाय नमः ।

ॐ भद्रकरणाय नमः ।
ॐ अश्विनीपुष्करोज्ज्वलाय १५०
ॐ प्रशस्तवते नमः ।
ॐ निस्तुलनाय नमः ।
ॐ प्रबन्धशतकल्पनाय नमः ।
ॐ भूनेत्रे नमः ।
ॐ भूधराय नमः ।
ॐ भोगिने नमः ।
ॐ भाग्यदायिने नमः ।
ॐ भवप्रियाय नमः ।

ॐ कर्मन्दिने नमः ।
ॐ वललाय नमः ।१६०
ॐ क्लीबाय नमः ।
ॐ पशुपालाय नमः ।
ॐ अश्वपालकाय नमः ।
ॐ शनिपीडाविनाशिने नमः ।
ॐ कृत्यादोषनिबर्हणाय नमः ।
ॐ अभिचारिकविध्वंसिने नमः ।
ॐ गदावनदवानलाय नमः ।
ॐ जपपूजार्चनरताय नमः ।

ॐ नारायणपदाय नमः ।
ॐ पराय नमः ।९७०
ॐ पापपाषाणदलन टङ्की-
कृत करावलये नमः ।
ॐ मोक्षलक्ष्मीकवाटाय नमः ।
ॐ मातृकावर्णमण्डनाय नमः ।
ॐ अकारादिक्षकारान्तवर्ण-
मालाविभूषणाय नमः ।
ॐ अनुस्वारादिसंख्यात्मने नमः ।

ॐ स्वराय नमः ।
ॐ व्यञ्जनाय नमः ।
ॐ सर्वार्थदाय नमः ।
ॐ सर्वकर्मणे नमः ।
ॐ सर्वकार्यप्रकाशकायनमः ।
ॐ पञ्चाविंशतितत्त्वस्थाय नमः ।
ॐ पञ्चब्रह्मसमुद्भवाय नमः ।
ॐ पारमार्थिकसन्दायिने नमः ।
ॐ पंग्वादिगतिदायकाय नमः ।

ॐ सफलीकृतपूजार्थाय नमः ।
ॐ विफलीकृतदुष्कृतये नमः ।
ॐ श्रुतिस्मृति समाम्नात-
स्मार्तकर्मप्रकाशकाय नमः ।
ॐ यज्ञोपवीतधारिणे नमः ।
ॐ याज्ञवल्क्यादिवंदिताय नमः ।
ॐ सुषुम्नायोगमध्यस्थाय ९९०
ॐ लम्बिकायोगसाधनाय नमः ।
ॐ सालंबनोद्दीपनदिक्रिया –
बीजाय नमः ।

ॐ महामनवे नमः ।
ॐ कल्यातिशायिसङ्कल्पाय नमः ।
ॐ विकल्पविधिवर्जिताय नमः ।
ॐ अनल्पमूर्तये नमः ।
ॐ अश्वात्मने नमः ।
ॐ स्वात्मानन्दविधायकाय नमः ।
ॐ आत्मानात्मविवेकज्ञाय १०००
ॐ निरावरणबोधनय नमः ।
ॐ तत्त्वनिदानभूताय नमः ।
ॐ नित्यकल्याणसुन्दराय नमः ।

ॐ शान्तरक्षणनिर्निद्राय नमः ।
ॐ श्रुतिस्मृतिशुभद्रुमाय नमः ।
ॐ आलापीकृतवेदाङ्गाय नमः ।
ॐ मालालंकृतकन्धराय नमः ।
ॐ रुद्राक्षकङ्कणलसत्कराय नमः
ॐ रुद्रजपप्रियाय नमः ।
ॐ सदाशिवपरब्रह्मस्थानाय१०१०
ॐ श्रीशम्भुविग्रहाय नमः ।
ॐ मूलाधाराम्बुजारूढाय नमः ।

ॐ दहराकाशमध्यगाय नमः ।
ॐ सहस्राराम्बुजारूढाय नमः ।
ॐ ज्ञानडोलाविलासवते नमः ।
ॐ वेलोल्लङ्घनसामर्थ्याय नमः ।
ॐ वेत्रे, निर्वृतिदायकाय नमः ।
ॐ सुरभूसुरदत्तार्घ्यशुद्धांब-
ग्रहणरताय नमः ।
ॐ ब्रह्मवर्चस्वितामृताय नमः ।
ॐ ब्रह्मणे, श्रीसूर्यविग्रहायनमः ।

॥ सूर्याष्टोत्तरशतनामस्तोत्रम् ॥

अरुणाय शरण्याय करुणारससिंधवे ।
असमानबलायार्तरक्षकाय नमो नमः ॥ १
आदित्यायादिभूताय अखिलागमवेदिने ।
अच्युतायाखिलज्ञाय अनंताय नमो नमः ॥ २
इनाय विश्वरूपाय ज्यायेंद्राय भानवे ।
इन्दिरामंदिराप्ताय वन्दनीयाय ते नमः ॥ ३
ईशाय सुप्रसन्नाय सुशीलाय सुवर्चसे ।
वसुप्रदाय वसवे वासुदेवाय ते नमः ॥ ४
उज्ज्वलायोग्ररूपाय ऊर्ध्वगाय विवस्वते ।

उद्यत्किरणजालाय हृषीकेशाय ते नमः ॥ ५
ऊर्जस्वलाय वीराय निर्जराय जयाय च ।
ऊरुद्वयाभावरूपयुक्तसारथये नमः ॥ ६
ऋषिवंद्याय रुग्धंत्रे ऋक्षचक्रचराय च ।
ऋजुस्वभावचित्ताय नित्यस्तुत्याय ते नमः ॥ ७
ऋकारमातृकावर्णरूपायोज्ज्वलतेजसे ।
ऋक्षाधिनाथमित्राय पुष्कराक्षाय ते नमः ॥ ८
लुप्तदंताय शांताय कांतिदाय घनाय च ।
कनत्कनकभूषाय खद्योताय नमो नमः ॥ ९

लूनिताखिलदैत्थाय सत्यानन्दस्वरूपिणे ।
अपवर्गप्रदायार्तशरण्याय नमो नमः ॥ १०
एकाकिने भगवते सृष्टिस्थित्यन्तकारिणे ।
गुणात्मने घृणिभृते बृहते ब्रह्मणे नमः ॥ ११
ऐश्वर्यदाय शर्वाय हरिदश्वाय शौरये ।
दशदिक्संप्रकाशाय भक्तवश्याय ते नमः ॥ १२
ओजस्कराय जयिने जगदानन्दहेतवे ।
जन्ममृत्युजराव्याधिवर्जिताय नमो नमः ॥ १३
औन्नत्यपदसंचाररथस्थाय सुरारये ।
कमनीयकरायाब्जवल्लभाय नमो नमः ॥ १४

अंतर्बहिः प्रकाशाय अचिन्त्यायात्मरूपिणे ।
अच्युतायामरेशाय परस्मै ज्योतिषे नमः ॥ १५
अहस्कराय रवये हरये परमात्मने ।
तरुणाय वरेण्याय ग्रहाणां पतये नमः ॥ १६
ओं नमो भास्करायादिमध्यांतरहिताय च ।
सौख्यप्रदाय सकलजगतां पतये नमः ॥ १७
नमस्सूर्याय कवये नमो नारायणाय च ।
नमो नमः परेशाय तेजोरूपाय ते नमः ॥ १८
ओं श्रीं हिरण्यगर्भाय ओं ह्रीं संपत्कराय च ।

ओं ऐंमिष्टार्थदायाशुप्रसन्नाय नमो नमः ॥ १९
श्रीमते श्रेयसे भक्तकोटिसौख्यप्रदायिने ।
निखिलागमवेद्याय नित्यानन्दाय ते नमः ॥ २०
यो मानवस्सन्ततमर्कमर्चयन् पठेत् प्रभाते विमलेन चेतसा ।
इमानि नामानि च तस्य पुण्यमायुर्धनं धान्यमुपैति नित्यम् ॥ २१
इमं स्तवं देववरस्य कीर्तयेच्छृणोति योऽयं सुमनास्समाहितः ।
स मुच्यते शोकदवाग्निसागरात्प्राप्नोति सर्वान् मनसो यथेप्सितान् ॥२२

॥ श्रीमदथर्वणरहस्ये सूर्याष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

ॐ अरुणाय नमः ।

ॐ शरण्याय नमः ।

ॐ करुणारससिन्धवे नमः ।

ॐ असमानबलाय नमः ।

ॐ आर्तरक्षकाय नमः ।

ॐ आदिभूताय नमः ।

ॐ अखिलागमवेदिने नमः ।

ॐ अच्युताय नमः ।

ॐ अखिलज्ञाय नमः । १०

ॐ अनन्ताय नमः ।

ॐ इनाय नमः ।

ॐ विश्वरूपाय नमः ।

ॐ इज्याय नमः ।

ॐ इन्द्रायनमः ।

ॐ भानवे नमः ।

ॐ इन्दिरामन्दिराय नमः ।

ॐ आप्ताय नमः ।

ॐ वन्दनीयाय नमः ।

ॐ ईशाय नमः । २०
ॐ सुप्रसन्नाय नमः ।
ॐ सुशीलाय नमः ।
ॐ सुवर्चसे नमः ।
ॐ वसुप्रदाय नमः ।
ॐ वसवे नमः ।
ॐ वासुदेवाय नमः ।
ॐ उज्ज्वलाय नमः ।
ॐ उग्ररूपाय नमः ।
ॐ ऊर्ध्वगाय नमः ।

ॐ विवस्वते नमः । ३०
ॐ उद्यत्किरणजालाय नमः ।
ॐ हृषीकेशाय नमः ।
ॐ ऊर्जस्वलाय नमः ।
ॐ वीराय नमः ।
ॐ निर्जराय नमः ।
ॐ जयाय नमः ।
ॐ ऊरुद्वयाभावरूपयुक्तसारथये ।
ॐ रुग्घन्त्रे नमः ।
ॐ ऋक्षचक्रचराय नमः ।

ॐ ऋजुस्वभावचित्ताय नमः ४०
ॐ नित्यस्तुत्याय नमः ।
ॐ ऋकारमातृकावर्णरूपाय ।
ॐ उज्वलतेजसे नमः ।
ॐ ऋक्षाधिनाथाय नमः ।
ॐ मित्राय नमः ।
ॐ पुष्कराक्षाय नमः ।
ॐ लुप्तदन्ताय नमः ।
ॐ शान्ताय नमः ।

ॐ कान्तिदाय नमः ।
ॐ धनाय नमः ।५०
ॐ कनत्कनकभूषाय नमः ।
ॐ खद्योताय नमः ।
ॐ लूनिताखिलदैत्याय नमः ।
ॐ सत्यानन्दस्वरूपिणे नमः ।
ॐ अपवर्गप्रदाय नमः ।
ॐ आर्तशरण्याय नमः ।
ॐ एकाकिने नमः ।

ॐ भगवते नमः ।
ॐ सृष्टिस्थित्यन्तकारिणे नमः ।
ॐ गुणात्मने नमः । ६०
ॐ घृणिभृते नमः ।
ॐ बृहते नमः ।
ॐ ब्रह्मण नमः ।
ॐ ऐश्वर्यदाय नमः ।
ॐ शर्वाय नमः ।
ॐ हरिदश्वाय नमः ।
ॐ शौरये नमः ।

ॐ दशदिक्सम्प्रकाशाय नमः ।
ॐ भक्तवश्याय नमः ।
ॐ ओजस्कराय नमः । ७०
ॐ जयिने नमः ।
ॐ जगदानन्दहेतवे नमः ।
ॐ जन्ममृत्युजराव्याधि-
वर्जिताय नमः ।
ॐ औन्नत्यपदसञ्चाररथस्थाय
ॐ असुरारये नमः ।
ॐ कमनीयकराय नमः ।

ॐ अब्जवल्लभाय नमः ।
ॐ अन्तर्बहिःप्रकाशाय नमः ।
ॐ अचिन्त्याय नमः ।
ॐ आत्मरूपिणे नमः ।८०
ॐ अच्युताय नमः ।
ॐ अमरेशाय नमः ।
ॐ परस्मै नमः ।
ॐ ज्योतिषे नमः ।
ॐ अहस्कराय नमः ।
ॐ रवये नमः ।
ॐ हरये नमः ।
ॐ परमात्मने नमः ।
ॐ तरुणाय नमः ।
ॐ वरेण्याय नमः ।९०
ॐ ग्रहाणांपतये नमः ।
ॐ भास्कराय नमः ।
ॐ आदिमध्यान्तरहिताय नमः ।
ॐ सौख्यप्रदाय नमः ।

ॐ सकलजगतांपतये नमः ।

ॐ सूर्याय नमः ।

ॐ कवये नमः ।

ॐ नारायणाय नमः ।

ॐ परेशाय नमः ।

ॐ तेजोरूपाय नमः । १००

ॐ ह्रीं हिरण्यगर्भाय नमः ।

ॐ ऐं इष्टार्थदाय नमः ।

ॐ आशुप्रपन्नाय नमः ।

ॐ श्रीमतेनमः ।

ॐ श्रेयसे नमः ।

ॐ भक्तकोटिसौख्यप्रदायिने नमः ।

ॐ निखिलागमवेद्याय नमः ।

ॐ नित्यानन्दाय नमः । १०८

।। सूर्याष्टोत्तरशतनामावलिः समाप्ता ॥

॥ सूर्यकवचम् ॥

ॐ ॥ अस्य श्रीसूर्यकवचस्तोत्रमहामन्त्रस्य । अगस्त्यो भगवान् ऋषिः । अनुष्टुप्छन्दः । सूर्यो देवता । श्रीं बीजम् । णीं शक्तिः । सूं कीलकम् । मम सूर्यप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

ध्यानम्-

जपाकुसुमसङ्काशं द्विभुजं पद्महस्तकम् ।
सिन्दूराम्बरमाल्यं च रक्तगन्धानुलेपनम् ॥ १

माणिक्यरत्नखचितसर्वाभरणभूषितम् ।
सप्ताश्वरथवाहन्तु मेरुं चैव प्रदक्षिणम् ॥ २

देवासुरवरैर्वन्द्यं घृणिभिः परिसेवितम् ।

ध्यायेत्पठेत्सुवर्णाभं सूर्यस्य कवचं मुदा ॥ ३

घृणिः पातु शिरोदेशे सूर्यः पातु ललाटकम् ।
आदित्यो लोचने पातु श्रुतिं पातु दिवाकरः ॥ ४

घ्राणं पातु सदा भानुः मुखं पातु सदा रविः ।
जिह्वां पातु जगन्नेत्रः कंठं पातु विभावसुः ॥ ५

स्कन्धौ ग्रहपतिः पातु भुजौ पातु प्रभाकरः ।
करावब्जकरः पातु हृदयं पातु भानुमान् ॥ ६

मध्यं पातु सुसप्ताश्वो नाभिं पातु नभोमणिः ।
द्वादशात्मा कटिं पातु सविता पातु सक्थिनी ॥ ७

ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः ।
जंघे मे पातु मार्तांडो गुल्फौ पातु.भिषांपतिः ॥ ८
पादौ दिनमणिः पातु पातु मित्रोऽखिलं वपुः ।
श्रीसूर्यकवचं पुण्यमभेद्यं वज्रसन्निभम् ॥ ९
सर्वरोगभयादिभ्यो मुच्यते नात्र संशयः ।
संवत्सरमुपासित्वा साम्राज्यपदवीं लभेत् ॥ १०
अनेकरत्नसंयुक्तं स्वर्णमाणिक्यभूषणम् ।
कल्पवृक्षसमाकीर्णं कदंबकुसुमप्रियम् ॥ ११
तप्तकाञ्चनसंकाशं सहस्रकिरणावृतम् ।

अशेषरोगशांत्यर्थं ध्यायेदादित्यमण्डलम् ॥ १२

सिन्दूरवर्णाय सुमण्डलाय सुवर्णरत्नाभरणाय तुभ्यम् ।
पद्माभिनेत्राय सुपङ्कजाय ब्रह्मेन्द्रनारायणशङ्कराय ॥ १३

संरक्तचूर्णं ससुवर्णतोयं सकुंकुमाभं सकुशं सपुष्पम् ।
प्रदत्तमादाय च हेमपात्रे प्रशस्तनादं भगवन्प्रसीद ॥ १४

॥ इति सूर्यकवचं सम्पूर्णम् ॥

१ अन्नपूर्णासहस्रनामस्तोत्रम् । नामावलीसहितम्
२ गोपालसहस्रनामस्तोत्रम् । नामावलीसहितम्
३ गायत्रीसहस्रनामस्तोत्रम् । नामावलीसहितम्
४ आञ्जनेयसहस्रनामस्तोत्रम् । नामावलीसहितम्
५ कालिकासहस्रनामस्तोत्रम् । नामावलीसहितम्
६ सीतासहस्रनामस्तोत्रम् । नामावलीसहितम्
७ सरस्वतीसहस्रनामस्तोत्रम् । नामावलीसहितम्
८ भवानीसहस्रनामस्तोत्रम् । नामावलीसहितम्
९ श्रीकृष्णसहस्रनामस्तोत्रम् । नामावलीसहितम्
१० लक्ष्मीनृसिंहसहस्रनामस्तोत्रम् । नामावलीसहितम्
११ बालासहस्रनामस्तोत्रम् । नामावलीसहितम्
१२ शनैश्चरसहस्रनामस्तोत्रम् । नामावलीसहितम्
१३ सूर्यसहस्रनामस्तोत्रम् । नामावलीसहितम्
१४ ललितासहस्रनामस्तोत्रम् । नामावलीसहितम्
१५ श्रीविष्णुसहस्रनामस्तोत्रम् । नामावलीसहितम्